ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# प्रथमकाण्डे षष्ठः प्रश्नः

# Version Notes:

**This is now the current Version 1.0 dated October 31, 2021.**

1. This replaces the earlier version 1.0 dated June 30, 2021.

2. We have listened to the Pada Parayanam telecast by TTD channel. No corrections found . Further , no corrections found and reported till October 15, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

# Previous Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st May 2019 |
| 2nd | Version Number | 0.1 dated 31st March 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2020 |
| 5th | Version Number | 1.0 dated 30th June 2021 |

Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं .......................................................... 5

1.6 प्रथमकाण्डे षष्ठः प्रश्नः – याजमानकाण्डं .......... 5

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं

## 1.6 प्रथमकाण्डे षष्ठः प्रश्नः – याजमानकाण्डं

**TS 1.6.1.1**

सं त्वा सिञ्चामि यजुषा प्रजामायुर्द्धनं च ।

बृहस्पतिप्रसूतो यजमान इह मा रिषत् ॥

आज्यमसि सत्यमसि सत्यस्याद्ध्यक्षमसि हविरसि वैश्वानरं

वैश्वदेव–मुत्पूतशुष्मꣳ सत्यौजाः सहो ऽसि

सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः

सहस्व पृतन्यतः ।

सहस्रवीर्यमसि तन्मा जिन्वाज्यस्याज्यमसि सत्यस्य

सत्यमसि सत्यायु –[ ] 1

**TS 1.6.1.1 (Padam)**

समिति । त्वा । सिञ्चामि । यजुषा । प्रजामिति प्र–जाम् । आयुः । धनम् । च ॥ बृहस्पतिप्रसूत इति बृहस्पति – प्रसूतः । यजमानः । इह । मा । रिषत् ॥ आज्यम् । असि । सत्यम् । असि । सत्यस्य । अद्ध्यक्षमित्यधि – अक्षम् । असि । हविः । असि । वैश्वानरम् । वैश्वदेवमिति वैश्व – देवम् । उत्पूतशुष्ममित्युत्पूत – शुष्मम् । सत्यौजा इति सत्य–ओजाः । सहः । असि । सहमानम् । असि । सहस्व । अरातीः । सहस्व । अरातीयतः । सहस्व । पृतनाः । सहस्व । पृतन्यतः । सहस्रवीर्यमिति सहस्र–विर्यम् । असि । तत् । मा । जिन्व । आज्यस्य । आज्यम् । असि । सत्यस्य । सत्यम् । असि । सत्यायुरिति सत्य – आयुः । **1 (50)**

**TS 1.6.1.2**

रसि सत्यशुष्ममसि सत्येन त्वा ऽभि घारयामि तस्य ते भक्षीय पञ्चानां त्वा वातानां यँन्त्राय धर्त्राय गृह्णामिपञ्चानां त्वर्तूनां यँन्त्राय धर्त्राय गृह्णामिपञ्चानां त्वा दिशां यँन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा पञ्चजनानां यँन्त्राय धर्त्राय गृह्णामिचरोस्त्वा

पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामिब्रह्मणस्त्वा तेजसे यन्त्राय धर्त्राय
गृह्णामि क्षत्रस्य त्वौजसे यन्त्राय – [ ] **2**

**TS 1.6.1.2 (Padam)**

असि । सत्यशुष्ममिति सत्य – शुष्मम् । असि । सत्येन । त्वा ।
अभीति । घारयामि । तस्य । ते । भक्षीय । पञ्चानाम् । त्वा ।
वातानाम् । यन्त्राय । धर्त्राय । गृह्णामि । पञ्चानाम् । त्वा । ऋतूनाम् ।
यन्त्राय । धर्त्राय । गृह्णामि । पञ्चानाम् । त्वा । दिशाम् । यन्त्राय ।
धर्त्राय । गृह्णामि । पञ्चानाम् । त्वा । पञ्चजनानामिति
पञ्च – जनानाम् । यन्त्राय । धर्त्राय । गृह्णामि । चरोः । त्वा ।
पञ्चबिलस्येति पञ्च – बिलस्य । यन्त्राय । धर्त्राय । गृह्णामि ।
ब्रह्मणः । त्वा । तेजसे । यन्त्राय । धर्त्राय । गृह्णामि । क्षत्रस्य । त्वा ।
ओजसे । यन्त्राय । **2 (50)**

**TS 1.6.1.3**

धर्त्राय गृह्णामि विशे त्वा यन्त्राय धर्त्राय गृह्णामिसुवीर्याय त्वा गृह्णामि
सुप्रजास्त्वाय त्वा गृह्णामिरायस्पोषाय त्वा गृह्णामि ब्रह्मवर्चसाय त्वा

गृह्णामि-भूरस्माकꣳ हविर्देवाना-माशिषो यजमानस्य देवानां
त्वा देवताभ्यो गृह्णामि कामाय त्वा गृह्णामि ॥ **3**

**TS 1.6.1.3 (Padam)**

धर्त्राय । गृह्णामि । विशे । त्वा । यन्त्राय । धर्त्राय । गृह्णामि ।
सुवीर्यायेति सु – वीर्याय । त्वा । गृह्णामि । सुप्रजास्त्वायेति
सुप्रजाः – त्वाय । त्वा । गृह्णामि । रायः । पोषाय । त्वा । गृह्णामि ।
ब्रह्मवर्चसायेति ब्रह्म–वर्चसाय । त्वा । गृह्णामि । भूः । अस्माकम् ।
हविः । देवानाम् । आशिष इत्या–शिषः । यजमानस्य । देवानाम् ।
त्वा । देवताभ्यः । गृह्णामि । कामाय । त्वा । गृह्णामि ॥ **3 (33)**

**(सत्यायु–रोजसे यन्त्राय–त्रयस्त्रिꣳशच्च)** *(A1)*

**TS 1.6.2.1**

ध्रुवो ऽसि ध्रुवो ऽहꣳ सजातेषु भूयासं धीरश्चेत्ता
वसुविदुग्रो ऽस्युग्रो ऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता
वसुवि–दभिभूरस्यभिभूरहꣳ सजातेषु भूयास–मभिभूश्चेत्ता
वसुविद्युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ॥

इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्–जीवेम बलिहृतो वयं ते ॥
यन्मे अग्ने अस्य यज्ञस्य रिष्याद् – [ ] **4**

**TS 1.6.2.1 (Padam)**

ध्रुवः । असि । ध्रुवः । अहम् । सजातेष्विति स – जातेषु ।
भूयासम् । धीरः । चेत्ता । वसुविदिति वसु – वित् । उग्रः । असि ।
उग्रः । अहम् । सजातेष्विति स–जातेषु । भूयासम् । उग्रः । चेत्ता ।
वसुविदिति वसु – वित् । अभिभूरित्यभि – भूः । असि ।
अभिभूरित्यभि – भूः । अहम् । सजातेष्विति स – जातेषु ।
भूयासम् । अभिभूरित्यभि – भूः । चेत्ता । वसुविदिति वसु–वित् ।
युनज्मि । त्वा । ब्रह्मणा । दैव्येन । हव्याय । अस्मै । वोढवे ।
जातवेद इति जात – वेदः ॥ इन्धानाः । त्वा । सुप्रजस इति
सु – प्रजसः । सुवीरा इति सु – वीराः । ज्योक् । जीवेम ।
बलिहृत इति बलि – हृतः । वयम् । ते ॥ यत् । मे । अग्ने ।
अस्य । यज्ञस्य । रिष्यात् । **4 (50)**

**TS 1.6.2.2**

यद्–वा स्कन्दादाज्यस्योत विष्णो ।

तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्.ऋत्या उपस्थे ।

भूर्भुवस्सुवरुच्छुष्मो अग्ने यजमानायैधि निशुष्मो अभिदासते ।

अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वा–मर्त्यस्य ते

होतर्मूर्द्धन्ना जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायमनो ऽसि

प्राजापत्यं मनसा मा भूतेनाऽऽ विश वागस्यैन्द्री

सपत्नक्षयणी – [ ] **5**

**TS 1.6.2.2 (Padam)**

यत् । वा । स्कन्दात् । आज्यस्य । उत । विष्णो इति ॥ तेन । हन्मि ।

सपत्नम् । दुर्मरायुमिति दुः – मरायुम् । एति । एनम् । दधामि ।

निर्.ऋत्या इति निः–ऋत्याः । उपस्थ इत्युप – स्थे ॥ भूः । भुवः ।

सुवः । उच्छुष्म इत्युत् – शुष्मः । अग्ने । यजमानाय । एधि ।

निशुष्म इति नि–शुष्मः । अभिदासत इत्यभि – दासते ॥ अग्ने ।

देवेद्धेति देव – इद्ध । मन्विद्धेति मनु – इद्ध ।

मन्द्रजिह्वेति मन्द्र–जिह्व । अमर्त्यस्य । ते । होतः । मूर्द्धन्न् । एति ।

जिघर्मि । रायः । पोषाय । सुप्रजास्त्वायेति सुप्रजाः – त्वाय ।
सुवीर्यायेति सु – वीर्याय । मनः । असि । प्राजापत्यमिति
प्राजा–पत्यम् । मनसा । मा । भूतेन । एति । विश । वाक् । असि ।
ऐन्द्री । सपत्नक्षयणीति सपत्न – क्षयणी । **5 (50)**

**TS 1.6.2.3**

वाचा मेन्द्रियेणाऽऽ विश वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु
ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु वर्.षा ऋतूनां प्रीणामि ता
मा प्रीताः प्रीणन्तु शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु
हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीता–मग्नीषोमयो–रहं
देवयज्यया चक्षुष्मान् भूयासमग्नेरहं देवयज्यया ऽन्नादो
भूयासं – [ ] **6**

**TS 1.6.2.3 (Padam)**

वाचा । मा । इन्द्रियेण । एति । विश । वसन्तम् । ऋतूनाम् ।
प्रीणामि । सः । मा । प्रीतः । प्रीणातु । ग्रीष्मम् । ऋतूनाम् ।
प्रीणामि । सः । मा । प्रीतः । प्रीणातु । वर्.षा ः । ऋतूनाम् ।
प्रीणामि । ताः । मा । प्रीताः । प्रीणन्तु । शरदम् । ऋतूनाम् ।

प्रीणामि । सा । मा । प्रीता । प्रीणातु ।
हेमन्तशिशिराविति हेमन्त – शिशिरौ । ऋतूनाम् । प्रीणामि । तौ ।
मा । प्रीतौ । प्रीणीताम् । अग्नीषोमयोरित्यग्नी – सोमयोः । अहम् ।
देवयज्ययेति देव– यज्यया । चक्षुष्मान् । भूयासम् । अग्नेः ।
अहम् । देवयज्ययेति देव – यज्यया । अन्नाद इत्यन्न – अदः ।
भूयासम् । **6 (50)**

**TS 1.6.2.4**

दब्धिरस्यदब्धो भूयासममुं दभेय–मग्नीषोमयो–रहं
देवयज्यया वृत्रहा भूयासमिन्द्राग्नियो–रहं
देवयज्ययेन्द्रियाव्यन्नादो भूयासमिन्द्रस्याहं
देवयज्ययेन्द्रियावी भूयासं महेन्द्रस्याहं
देवयज्यया जेमानं महिमानं गमेयमग्नेः स्विष्टकृतो ऽहं
देवयज्यया ऽऽयुष्मान्. यज्ञेन प्रतिष्ठां गमेयं ॥ **7**

**TS 1.6.2.4 (Padam)**

दब्धिः । असि । अदब्धः । भूयासम् । अमुम् । दभेयम् ।
अग्नीषोमयोरित्यग्नी – सोमयोः । अहम् ।

देवयज्ययेति देव– यज्यया । वृत्रहेति वृत्र – हा । भूयासम् ।
इन्द्राग्नियोरितीन्द्र – अग्नियोः । अहम् । देवयज्ययेति
देव – यज्यया । इन्द्रियावी । अन्नाद इत्यन्न – अदः । भूयासम् ।
इन्द्रस्य । अहम् । देवयज्ययेति देव – यज्यया । इन्द्रियावी ।
भूयासम् । महेन्द्रस्येति महा – इन्द्रस्य । अहम् । देवयज्ययेति
देव – यज्यया । जेमानम् । महिमानम् । गमेयम् । अग्नेः ।
स्विष्टकृत इति स्विष्ट – कृतः । अहम् ।
देवयज्ययेति देव – यज्यया । आयुष्मान् । यज्ञेन ।
प्रतिष्ठामिति प्रति – स्थाम् । गमेयम् ॥ **7 (36)**

**(रिष्याथ्–सपत्नक्षयण्य–न्नादो भूयास(ग्ग्)–षट्त्रि(ग्ं)शच्च)** *(A2)*

**TS 1.6.3.1**

अग्निर्मा दुरिष्टात् पातु सविता ऽघश(ग्ं)साद्–यो मे ऽन्ति दूरे ऽरातीयति
तमेतेन जेष(ग्ं) सुरूपवर्.षवर्ण एहीमान् भद्रान् दुर्या(ग्ं) अभ्येहि
मामनुव्रता न्यु शीर्.षाणि मृढ्वमिड एह्यदित एहि सरस्वत्येहि
रन्तिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं ते ऽशीयोपहूत उपहवं–[ ] **8**

**TS 1.6.3.1 (Padam)**

अ॒ग्निः । मा॒ । दु॒रि॑ष्टा॒दि॒ति॒ दुः – इ॒ष्टा॒त् । पा॒तु॒ । स॒वि॒ता ।

अ॒घश॑ꣳसादि॒त्य॒घ–श॒ꣳसा॒त् । यः । मे॒ । अन्ति॑ । दू॒रे । अ॒रा॒ती॒यति॑ ।

तम् । ए॒तेन॑ । जे॒ष॒म् । सु॒रू॑पवर्.षव॒र्ण॒ इ॒ति॒ सु॒रू॒प – व॒र्.ष॒व॒र्णे॒ ।

एति॑ । इ॒हि॒ । इ॒मान् । भ॒द्रान् । दु॒र्या॑न् । अ॒भि । एति॑ । इ॒हि॒ । माम् ।

अ॑नु॒व्र॑ते॒त्य॒नु–व्र॒ता । नीति॑ । उ॒ । शी॒र्.षा॑णि । मृ॒ढ्व॒म् । इडे॒॑ । एति॑ ।

इ॒हि॒ । अदि॑ते । एति॑ । इ॒हि॒ । सर॑स्वति । एति॑ । इ॒हि॒ । रन्तिः॑ ।

अ॒सि॒ । रम॑तिः । अ॒सि॒ । सू॒नरी॒॑ । अ॒सि॒ । जु॒ष्टे॒॑ । जुष्टि॒॑म् । ते॒ ।

अ॒शी॒य॒ । उप॑हूत॒ इ॒त्युप॑ – हू॒ते॒ । उ॒प॒ह॒वमि॒त्युप॑ – ह॒वम् । **8 (50)**

**TS 1.6.3.2**

ते॑ ऽशी॒य॒ सा मे॑ स॒त्या ऽऽशी॒रस्य॑ य॒ज्ञस्य॑ भूया॒दरे॑डता॒ मन॑सा॒

तच्छ॑केयं ँय॒ज्ञो दिव॑ꣳ रोहतु य॒ज्ञो दिवं॑ गच्छतु॒ यो दे॑व॒यान॒ः

पन्था॒स्तेन॑ य॒ज्ञो दे॒वा॑ꣳ अप्ये॒॑त्व॒स्मास्विन्द्र॑ इन्द्रि॒यं॑ दधात्व॒स्मान् राय॑

उ॒त य॒ज्ञाः स॑चन्ता॒मस्मासु॒ सन्त्वा॒शिषः॒ सा नः॑ प्रि॒या सु॒प्रतू॒॑र्ति॒र्म॒घोनी॒

जुष्टि॑रसि जु॒षस्व॑ नो॒ जुष्टा॑ नो – [ ] **9**

**TS 1.6.3.2 (Padam)**

ते । अशीय । सा । मे । सत्या । आशीरित्या – शीः । अस्य ।

यज्ञस्य । भूयात् । अरेडता । मनसा । तत् । शकेयम् । यज्ञः ।

दिवम् । रोहतु । यज्ञः । दिवम् । गच्छतु । यः ।

देवयान इति देव–यानः । पन्थाः । तेन । यज्ञः । देवान् । अपीति ।

एतु । अस्मासु । इन्द्रः । इन्द्रियम् । दधातु । अस्मान् । रायः ।

उत । यज्ञाः । सचन्ताम् । अस्मासु । सन्तु ।

आशिष इत्या – शिषः । सा । नः । प्रिया ।

सुप्रतूर्तिरिति सु – प्रतूर्तिः । मघोनी । जुष्टिः । असि । जुषस्व ।

नः । जुष्टा । नः । **9 (50)**

**TS 1.6.3.3**

ऽसि जुष्टिं ते गमेयं मनो ज्योति र्जुषतामाज्यं ँविच्छिन्नं ँयज्ञꣳ

समिमं दधातु ।

बृहस्पति–स्तनुतामिमं नो विश्वे देवा इह मादयन्तां ।

ब्रद्ध्न पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोप

दसत् प्रजापते–र्भागो ऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि

समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यक्षितो ऽस्यक्षित्यै

त्वा ( ) मा मे क्षेष्ठा अमुत्रामुष्मिन् ँल्लोके ॥ **10**

**TS 1.6.3.3 (Padam)**

असि । जुष्टिम् । ते । गमेयम् । मनः । ज्योतिः । जुषताम् ।

आज्यम् । विच्छिन्नमिति वि – छिन्नम् । यज्ञम् । समिति । इमम् ।

दधातु । बृहस्पतिः । तनुताम् । इमम् । नः । विश्वे । देवाः । इह ।

मादयन्ताम् । ब्रद्ध्न । पिन्वस्व । ददतः । मे । मा । क्षायि ।

कुर्वतः । मे । मा । उपेति । दसत् । प्रजापतेरिति प्रजा – पतेः ।

भागः । असि । ऊर्जस्वान् । पयस्वान् । प्राणापानाविति

प्राण–अपानौ । मे । पाहि । समानव्यानाविति समान – व्यानौ । मे ।

पाहि । उदानव्यानावित्युदान – व्यानौ । मे । पाहि । अक्षितः ।

असि । अक्षित्यै । त्वा ( ) । मा । मे । क्षेष्ठाः । अमुत्र । अमुष्मिन् ।

लोके ॥ **10 (56)** **(उपहवं–जुष्टान–स्त्वा षट्च)** *(A3)*

**TS 1.6.4.1**

बर्.हिषो ऽहं देवयज्यया प्रजावान् भूयासं नराश॰ंसस्याहं

देवयज्यया पशुमान् भूयासमग्नेः स्विष्टकृतो ऽहं देवयज्यया

ऽऽयुष्मान्. यज्ञेन प्रतिष्ठां गमेयमग्नेरह–मुज्जिति–मनूज्जेष॒ꣳ

सोमस्याह–मुज्जिति–मनूज्जेषमग्नेरह–मुज्जिति–

मनूज्जेषमग्नीषोमयोरह–मुज्जिति–मनूज्जेष–मिन्द्राग्नियोरह–मुज्जिति-

मनूज्जेष–मिन्द्रस्याह – [ ] **11**

**TS 1.6.4.1 (Padam)**

बर्.हिषः । अहम् । देवयज्ययेति देव – यज्यया ।

प्रजावानिति प्रजा – वान् । भूयासम् । नराशꣳसस्य । अहम् ।

देवयज्ययेति देव – यज्यया । पशुमानिति पशु – मान् । भूयासम् ।

अग्नेः । स्विष्टकृत इति स्विष्ट – कृतः । अहम् । देवयज्ययेति

देव – यज्यया । आयुष्मान् । यज्ञेन । प्रतिष्ठामिति प्रति – स्थाम् ।

गमेयम् । अग्नेः । अहम् । उज्जितिमित्युत् – जितिम् । अनु ।

उदिति । जेषम् । सोमस्य । अहम् । उज्जितिमित्युत् – जितिम् ।

अनु । उदिति । जेषम् । अग्नेः । अहम् । उज्जितिमित्युत्–जितिम् ।

अनु । उदिति । जेषम् । अग्नीषोमयोरित्यग्नी – सोमयोः । अहम् ।

उज्जितिमित्युत् – जितिम् । अनु । उदिति । जेषम् ।

इन्द्राग्नियोरितीन्द्र – अग्नियोः । अहम् । उज्जितिमित्युत्–जितिम् । अनु । उदिति । जेषम् । इन्द्रस्य । अहम् । **11 (50)**

**TS 1.6.4.2**

मुज्जितिमनूज्जेषं महेन्द्रस्याह मुज्जिति–मनूज्जेषमग्नेः स्विष्टकृतो ऽह मुज्जिति–मनूज्जेषँ वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् ।

**अथा** सपत्ना(ँ) इन्द्रो मे निग्राभेणाधरा(ँ) अकः ॥

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्न् ।

**अथा** सपत्ना–निन्द्राग्नी मे विषूचीनान् व्यस्यतां ॥

एमा अग्मन्नाशिषो दोहकामा इन्द्रवन्तो – [ ] **12**

**TS 1.6.4.2 (Padam)**

उज्जितिमित्युत् – जितिम् । अनु । उदिति । जेषम् । महेन्द्रस्येति महा – इन्द्रस्य । अहम् । उज्जितिमित्युत्–जितिम् । अनु । उदिति । जेषम् । अग्नेः । स्विष्टकृत इति स्विष्ट – कृतः । अहम् । उज्जितिमित्युत् – जितिम् । अनु । उदिति । जेषम् । वाजस्य । मा । प्रसवेनेति प्र – सवेन । उद्ग्राभेणेत्युत् – ग्राभेण । उदिति । अग्रभीत् ॥ अथ । सपत्नान् । इन्द्रः । मे ।

निग्राभेणेति नि – ग्राभेण । अधरान् । अकः ॥

उद्ग्राभमित्युत् – ग्राभम् । च । निग्राभमिति नि – ग्राभम् । च ।

ब्रह्म । देवाः । अवीवृधन्न् ॥ अथ । सपत्नान् । इन्द्राग्नी

इतीन्द्र – अग्नी । मे । विषूचीनान् । वीति । अस्यताम् ॥ एति ।

इमाः । अग्मन्न् । आशिष इत्या – शिषः । दोहकामा इति

दोह – कामाः । इन्द्रवन्त इतीन्द्र– वन्तः । **12 (50)**

**<u>TS 1.6.4.3</u>**

वनामहे धुक्षीमहि प्रजामिषं ॥

रोहितेन त्वा ऽग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्वेतशेन

त्वा सूर्यो देवतां गमयतु वि ते मुञ्चामि रशना वि रश्मीन्. वि

योक्त्रा यानि परिचर्तनानि धत्तादस्मासु द्रविणं ँयच्च भद्रं प्र णो

ब्रूताद्–भागधान् देवतासु ॥

विष्णोः शम्ँयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेय७् सोमस्याहं

देवयज्यया – [ ] **13**

**TS 1.6.4.3 (Padam)**

वनामहे । धुक्षीमहि । प्रजामिति प्र–जाम् । इषम् ॥ रोहितेन । त्वा । अग्निः । देवताम् । गमयतु । हरिभ्यामिति हरि – भ्याम् । त्वा । इन्द्रः । देवताम् । गमयतु । एतशेन । त्वा । सूर्यः । देवताम् । गमयतु । वीति । ते । मुञ्चामि । रशनाः । वीति । रश्मीन् । वीति । योक्त्रा । यानि । परिचर्तनानीति परि – चर्तनानि । धत्तात् । अस्मासु । द्रविणम् । यत् । च । भद्रम् । प्रेति । नः । ब्रूतात् । भागधानिति भाग – धान् । देवतासु ॥ विष्णोः । शम्ँयोरिति शं – योः । अहम् । देवयज्ययेति देव–यज्यया । यज्ञेन । प्रतिष्ठामिति प्रति – स्थाम् । गमेयम् । सोमस्य । अहम् । देवयज्ययेति देव – यज्यया । **13 (50)**

**TS 1.6.4.4**

सुरेता रेतो धिषीय त्वष्टुरहं देवयज्यया पशूना८ं रूपं पुषेयं देवानां पत्नीरग्नि र्गृहपति र्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासं ँवेदो ऽसि वित्तिरसि विदेय कर्मासि करुणमसि

क्रियासꣳ सनिरसि सनिता ऽसि सनेयं घृतवन्तं कुलायिनꣳ
रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनं ॥ **14**

**TS 1.6.4.4 (Padam)**

सुरेता इति सु – रेताः । रेतः । धिषीय । त्वष्टुः । अहम् ।
देवयज्ययेति देव–यज्यया । पशूनाम् । रूपम् । पुषेयम् । देवानाम् ।
पत्नीः । अग्निः । गृहपतिरिति गृह – पतिः । यज्ञस्य । मिथुनम् ।
तयोः । अहम् । देवयज्ययेति देव – यज्यया । मिथुनेन । प्रेति ।
भूयासम् । वेदः । असि । वित्तिः । असि । विदेय । कर्म । असि ।
करुणम् । असि । क्रियासम् । सनिः । असि । सनिता ।
असि । सनेयम् । घृतवन्तमिति घृत–वन्तम् । कुलायिनम् । रायः ।
पोषम् । सहस्रिणम् । वेदः । ददातु । वाजिनम् ॥ **14 (44)**

**(इन्द्रस्याह–मिन्द्रवन्तः–सोमस्याहं देवयज्यया–चतुश्चत्वारिꣳशच्च)** *(A4)*

**TS 1.6.5.1**

आ प्यायतां ध्रुवा घृतेन यज्ञँयज्ञं प्रति देवयद्भ्यः ।
सूर्याया ऊधो ऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन्न् ॥

प्रजापतेर्विभान् नाम लोकस्तस्मि॑ꣳस्त्वा दधामि सह यजमानेन

सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे

भूया अक्षितमसि मा मे क्षेष्ठाः प्राच्यां दिशि देवा ऋत्विजो

मार्जयन्तां दक्षिणायां – [ ] **15**

**TS 1.6.5.1 (Padam)**

एति । प्यायताम् । ध्रुवा । घृतेन । यज्ञं ँयज्ञमिति यज्ञम् – यज्ञम् ।

प्रतीति । देवयद्भ्य इति देवयत् – भ्यः ॥ सूर्यायाः । ऊधः ।

अदित्याः । उपस्थ इत्युप – स्थे । उरुधारेत्युरु – धारा । पृथिवी ।

यज्ञे । अस्मिन्न् ॥ प्रजापतेरिति प्रजा–पतेः । विभानिति वि–भान् ।

नाम । लोकः । तस्मिन्न् । त्वा । दधामि । सह । यजमानेन ।

सत् । असि । सत् । मे । भूयाः । सर्वम् । असि । सर्वम् । मे ।

भूयाः । पूर्णम् । असि । पूर्णम् । मे । भूयाः । अक्षितम् । असि ।

मा । मे । क्षेष्ठाः । प्राच्याम् । दिशि । देवाः । ऋत्विजः ।

मार्जयन्ताम् । दक्षिणायाम् । **15 (50)**

**TS 1.6.5.2**

दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो
मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्द्ध्वायां
दिशि यज्ञः सँवथ्सरो यज्ञपति र्मार्जयन्तां ँविष्णोः
क्रमो ऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु वि क्रमे निर्भक्तः
स यं द्विष्मो विष्णोः क्रमो ऽस्यभिशस्तिहा त्रैष्टुभेन छन्दसा
ऽन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णोः क्रमो ऽस्यरातीयतो
हन्ता जागतेन छन्दसा दिवमनु वि क्रमे निर्भक्तः स यं द्विष्मो
विष्णोः क्रमो ऽसि शत्रूयतो हन्ता ऽऽनुष्टुभेन छन्दसा दिशो ऽनु
वि क्रमे निर्भक्तः स यं द्विष्मः ॥ **16**

**TS 1.6.5.2 (Padam)**

दिशि । मासाः । पितरः । मार्जयन्ताम् । प्रतीच्याम् । दिशि । गृहाः ।
पशवः । मार्जयन्ताम् । उदीच्याम् । दिशि । आपः । ओषधयः ।
वनस्पतयः । मार्जयन्ताम् । ऊर्द्ध्वायाम् । दिशि । यज्ञः । सम्ँवथ्सर
इति सं – वथ्सरः । यज्ञपतिरिति यज्ञ – पतिः । मार्जयन्ताम् ।
विष्णोः । क्रमः । असि । अभिमातिहेत्यभिमाति – हा । गायत्रेण ।

छन्दसा । पृथिवीम् । अनु । वीति । क्रमे । निर्भक्त इति

निः – भक्तः । सः । यम् । द्विष्मः । विष्णोः । क्रमः ।

असि । अभिशस्तिहेत्यभिशस्ति – हा । त्रैष्टुभेन । छन्दसा ।

अन्तरिक्षम् । अनु । वीति । क्रमे । निर्भक्त इति निः–भक्तः । सः ।

यम् । द्विष्मः । विष्णोः ( ) । क्रमः । असि । अरातीयतः ।

हन्ता । जागतेन । छन्दसा । दिवम् । अनु । वीति । क्रमे । निर्भक्त

इति निः – भक्तः । सः । यम् । द्विष्मः । विष्णोः । क्रमः । असि ।

शत्रूयत इति शत्रु – यतः । हन्ता । आनुष्टुभेनेत्यानु – स्थुभेन ।

छन्दसा । दिशः । अनु । वीति । क्रमे । निर्भक्त इति निः – भक्तः ।

सः । यम् । द्विष्मः ॥ **16 (79)**

**(दक्षिणाया – मन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो**

**विष्णो– रेकान्नत्रि॒ꣳशच्च)** *(A5)*

**<u>TS 1.6.6.1</u>**

अगन्म सुवः सुवरगन्म सन्दृशस्ते मा छित्सि यत्ते तपस्तस्मै ते

मा ऽऽ वृक्षि सुभूरसि श्रेष्ठो रश्मीनामायुर्द्धा अस्यायुर्मे धेहि वर्चोधा

असि वर्चो मयि धेहीदमहममुं भ्रातृव्यमाभ्यो दिग्भ्यो ऽस्यै

दिवो ऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि

निर्भक्तः स यं द्विष्मः ॥ **17**

**TS 1.6.6.1 (Padam)**

अगन्म । सुवः । सुवः । अगन्म । सन्दृश इति सं–दृशः । ते ।

मा । छित्सि । यत् । ते । तपः । तस्मै । ते । मा । एति । वृक्षि ।

सुभूरिति सु – भूः । असि । श्रेष्ठः । रश्मीनाम् । आयुर्द्धा

इत्यायुः – धाः । असि । आयुः । मे । धेहि ।

वर्चोधा इति वर्चः – धाः । असि ।

वर्चः । मयि । धेहि । इदम् । अहम् । अमुम् । भ्रातृव्यम् । आभ्यः ।

दिग्भ्य इति दिक् – भ्यः । अस्यै । दिवः । अस्मात् । अन्तरिक्षात् ।

अस्यै । पृथिव्याः । अस्मात् । अन्नाद्यादित्यन्न –अद्यात् । निरिति ।

भजामि । निर्भक्त इति निः – भक्तः । सः । यम् । द्विष्मः ॥ **17 (50)**

**TS 1.6.6.2**

सं ज्योतिषा ऽभूवमैन्द्री–मावृत–मन्वावर्ते समहं प्रजया सं मया

प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोषः समिद्धो अग्ने मे

दीदिहि समेद्धा ते अग्ने दीद्यासं ँवसुमान्. यज्ञो वसीयान्
भूयासमग्न आयू॒ꣳषि पवस आ सुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनां ॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं । **18**

**TS 1.6.6.2 (Padam)**

समिति । ज्योतिषा । अभूवम् । ऐन्द्रीम् । आवृतमित्या – वृतम् ।
अन्वावर्त इत्यनु – आवर्ते । समिति । अहम् । प्रजयेति प्र–जया ।
समिति । मया । प्रजेति प्र – जा । समिति । अहम् । रायः ।
पोषेण । समिति । मया । रायः । पोषः । समिद्ध इति सम् – इद्धः ।
अग्ने । मे । दीदिहि । समेद्धेति सम् – एद्धा । ते । अग्ने ।
दीद्यासम् । वसुमानिति वसु – मान् । यज्ञः । वसीयान् । भूयासम् ।
अग्ने । आयू॒ꣳषि । पवसे । एति । सुव । ऊर्जम् । इषम् । च ।
नः ॥ आरे । बाधस्व । दुच्छुनाम् ॥ अग्ने । पवस्व । स्वपा इति
सु–अपाः । अस्मे इति । वर्चः । सुवीर्यमिति सु–वीर्यम् ॥ **18 (50)**

**TS 1.6.6.3**

दधत्पोष॑ꣳ र॒यिं मयि॑ ।

अग्ने॑ गृहपते सुगृहप॒ति॒रहं त्वया॑ गृ॒हप॑तिना भूयासꣳ सुगृहप॒तिर्मया॒

त्वं गृ॒हप॑तिना भूयाः श॒तꣳ हिमा॒–स्तामा॒शि॒षमा शा॑से॒ तन्त॑वे॒

ज्योति॑ष्मती॒ं तामा॒शि॒षमा शा॑से॒ ऽमुष्मै॒ ज्योति॑ष्मती॒ं कस्त्वा युनक्ति॒

स त्वा॒ वि मु॑ञ्च॒त्वग्ने॑ व्रतपते व्र॒तम॑चारिषं॒ तदशक॒ं तन्मे ऽराधि य॒ज्ञो

बभू॒व स आ –[ ] **19**

**TS 1.6.6.3 (Padam)**

दधत् । पोष॑म् । र॒यिम् । मयि॑ ॥ अग्ने॑ । गृ॒ह॒प॒त॒ इति॑ गृह – प॒ते॒ ।

सु॒गृ॒ह॒प॒ति॑रिति सु – गृ॒ह॒प॒तिः । अ॒हम् । त्वया॑ ।

गृ॒हप॑ति॒नेति॑ गृ॒ह – प॒ति॒ना॒ । भू॒या॒स॒म् । सु॒गृ॒ह॒प॒तिरिति॑

सु – गृ॒ह॒प॒तिः । मया॑ । त्वम् । गृ॒हप॑ति॒नेति॑ गृ॒ह – प॒ति॒ना॒ । भू॒या॒ः ।

श॒तम् । हिमा॑ः । ताम् । आ॒शि॒षमित्या॑ – शिष॑म् । एति॑ । शा॒से॒ ।

तन्त॑वे । ज्योति॑ष्मतीम् । ताम् । आ॒शि॒षमित्या॑ – शिष॑म् । एति॑ ।

शा॒से॒ । अ॒मुष्मै॑ । ज्योति॑ष्मतीम् । कः । त्वा॒ । यु॒न॒क्ति॒ । सः । त्वा॒ ।

वीति॑ । मु॒ञ्च॒तु॒ । अग्ने॑ । व्र॒त॒प॒त॒ इति॑ व्रत – प॒ते॒ । व्र॒तम् ।

अचारिषम् । तत् । अशकम् । तत् । मे । अराधि । यज्ञः ।
बभूव । सः । एति । **19 (50)**

**TS 1.6.6.4**

बभूव स प्र जज्ञे स वावृधे ।
स देवानामधिपति र्बभूव सो अस्मा᳚ अधिपतीन् करोतु वय᳚
स्याम पतयो रयीणां ॥
गोमा᳚ अग्ने ऽविमा᳚ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः ।
इडावा᳚ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुद्ध्नः सभावान् ॥ **20**

**TS 1.6.6.4 (Padam)**

बभूव । सः । प्रेति । जज्ञे । सः । वावृधे ॥ सः । देवानाम् ।
अधिपतिरित्यधि – पतिः । बभूव । सः । अस्मान् ।
अधिपतीनित्यधि – पतीन् । करोतु । वयम् । स्याम । पतयः ।
रयीणाम् ॥ गोमानिति गो – मान् । अग्ने । अविमानित्यवि – मान् ।
अश्वी । यज्ञः । नृवथ्सखेति नृवत् – सखा । सदम् । इत् ।
अप्रमृष्य इत्यप्र – मृष्यः ॥ इडावानितीडा – वान् । एषः । असुर ।

प्रजावानिति प्रजा – वान् । दीर्घः । रयिः । पृथुबुद्ध्न इति

पृथु – बुद्ध्नः । सभावानिति सभा – वान् ॥ **20 (35)**

**(द्विष्मः–सुवीर्यं॒–स आ–पञ्चत्रिं॒शच्च)** *(A6)*

**TS 1.6.7.1**

यथा वै समृतसोमा एवं ँवा एते समृतयज्ञा यद्–दर्.शपूर्णमासौ

कस्य वा ऽह देवा यज्ञमागच्छन्ति कस्य वा न बहूनां

ँयजमानानां ँयो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वो

भूते यजत एतद्–वै देवानामायतनं ँयदाहवनीयो ऽन्तरा ऽग्नी

पशूनां गार्.हपत्यो मनुष्याणा–मन्वाहार्यपचनः

पितृणामग्निं गृह्णाति स्व एवायतने देवताः परि – [ ] **21**

**TS 1.6.7.1 (Padam)**

यथा । वै । समृतसोमा इति समृत – सोमाः । एवम् । वै । एते ।

समृतयज्ञा इति समृत – यज्ञाः । यत् । दर्.शपूर्णमासाविति

दर्.श – पूर्णमासौ । कस्य । वा । अह । देवाः । यज्ञम् ।

आगच्छन्तीत्या – गच्छन्ति । कस्य । वा । न । बहूनाम् ।

यजमानानाम् । यः । वै । देवताः । पूर्वः ।

परिगृह्णातीति परि – गृह्णाति । सः । एनाः । श्वः । भूते । यजते ।

एतत् । वै । देवानाम् । आयतनमित्या – यतनम् । यत् ।

आहवनीय इत्या – हवनीयः । अन्तरा । अग्नी इति । पशूनाम् ।

गार्.हपत्य इति गार्.ह – पत्यः । मनुष्याणाम् । अन्वाहार्यपचन

इत्यन्वाहार्य – पचनः । पितृणाम् । अग्निम् । गृह्णाति । स्वे । एव ।

आयतन इत्या – यतने । देवताः । परीति । **21 (50)**

**TS 1.6.7.2**

गृह्णाति ताः श्वो भूते यजते व्रतेन वै मेद्ध्यो ऽग्नि र्व्रतपति र्ब्राह्मणो

व्रतभृद्–व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतं चरिष्यामीत्यग्निर्वै

देवानां ँव्रतपति–स्तस्मा एव प्रतिप्रोच्य व्रतमा लभते बर्.हिषा

पूर्णमासे व्रतमुपैति वथ्सै–रमावास्या–यामेतद्ध्येतयो–

रायतनमुपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याहु र्मनुष्या – [ ] **22**

**TS 1.6.7.2 (Padam)**

गृह्णाति । ताः । श्वः । भूते । यजते । व्रतेन । वै । मेद्ध्यः । अग्निः ।

व्रतपतिरिति व्रत – पतिः । ब्राह्मणः । व्रतभृदिति व्रत – भृत् ।

व्रतम् । उपैष्यन्नित्युप – एष्यन्न् । ब्रूयात् । अग्ने ।

व्रतपत इति व्रत – पते । व्रतम् । चरिष्यामि । इति । अग्निः । वै ।
देवानाम् । व्रतपतिरिति व्रत – पतिः । तस्मै । एव ।
प्रतिप्रोच्येति प्रति – प्रोच्य । व्रतम् । एति । लभते । बर्.हिषा ।
पूर्णमास इति पूर्ण – मासे । व्रतम् । उपेति । एति । वथ्सैः ।
अमावास्यायामित्यमा – वास्यायाम् । एतत् । हि । एतयोः ।
आयतनमित्या – यतनम् । उपस्तीर्य इत्युप – स्तीर्यः । पूर्वः । च ।
अग्निः । अपरः । च । इति । आहुः । मनुष्याः । **22 (50)**

**TS 1.6.7.3**

इन् न्वा उपस्तीर्ण–मिच्छन्ति किमु देवा येषां नवावसान–
मुपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति य एवं ँविद्वानग्नि–मुपस्तृणाति
यजमानेन ग्राम्याश्च पशवो ऽवरुद्ध्या आरण्याश्चेत्याहुर्यद्
ग्राम्यानुपवसति तेन ग्राम्यानव रुन्धे यदारण्यस्याश्ञाति तेनारण्यान्.
यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्ञातीन्द्रियं – [ ] **23**

**TS 1.6.7.3 (Padam)**

इत् । नु । वा । उपस्तीर्णमियुप – स्तीर्णम् । इच्छन्ति । किम् ।
उ । देवाः । येषाम् । नवावसानमिति नव – अवसानम् । उपेति ।

अस्मिन्न् । श्वः । यक्ष्यमाणे । देवताः । वसन्ति । यः । एवम् ।

विद्वान् । अग्निम् । उपस्तृणातीत्युप – स्तृणाति । यजमानेन ।

ग्राम्याः । च । पशवः । अवरुद्ध्या इत्यव–रुद्ध्याः । आरण्याः ।

च । इति । आहुः । यत् । ग्राम्यान् । उपवसतीत्युप – वसति ।

तेन । ग्राम्यान् । अवेति । रुन्धे । यत् । आरण्यस्य । अश्नाति ।

तेन । आरण्यान् । यत् । अनाश्वान् । उपवसेदित्युप – वसेत् ।

पितृदेवत्य इति पितृ – देवत्यः । स्यात् । आरण्यस्य । अश्नाति ।

इन्द्रियम् । **23 (50)**

**TS 1.6.7.4**

ँवा आरण्यमिन्द्रियमेवाऽऽत्मन् धत्ते यदनाश्वानुपवसेत् क्षोधुकः

स्याद्–यदश्नीयाद्–रुद्रो ऽस्य पशूनभि मन्येतापो ऽश्नाति

तन्नेवाशितं नेवा ऽनशितं न क्षोधुको भवति नास्य रुद्रः पशूनभि

मन्यते वज्रो वै यज्ञः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो

यदनाश्वानुपवसति वज्रेणैव साक्षात् ( ) क्षुधं भ्रातृव्यꣳ हन्ति ॥ **24**

**TS 1.6.7.4 (Padam)**

वै । आरण्यम् । इन्द्रियम् । एव । आत्मन्न् । धत्ते । यत् । अनाश्वान् । उपवसेदित्युप – वसेत् । क्षोधुकः । स्यात् । यत् । अश्ञीयात् । रुद्रः । अस्य । पशून् । अभीति । मन्येत । अपः । अश्ञाति । तत् । न । इव । अशितम् । न । इव । अनशितम् । न । क्षोधुकः । भवति । न । अस्य । रुद्रः । पशून् । अभीति । मन्यते । वज्रः । वै । यज्ञः । क्षुत् । खलु । वै । मनुष्यस्य । भ्रातृव्यः । यत् । अनाश्वान् । उपवसतीत्युप–वसति । वज्रेण । एव । साक्षादिति स–अक्षात् ( ) । क्षुधम् । भ्रातृव्यम् । हन्ति ॥ **24 (53)**

**(परि–मनुष्या–इन्द्रियं–साक्षात्–त्रीणि च)** *(A7)*

**TS 1.6.8.1**

यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्–दधते ऽपः प्र णयति श्रद्धा वा आपः श्रद्धामेवाऽऽरभ्य यज्ञेन यजत उभये ऽस्य देवमनुष्या इष्टाय श्रद्दधते तदाहुरति वा एता वर्त्रं नेदन्त्यति वाचं मनो वावैता नाति नेदन्तीति मनसा प्र णयतीयं वै मनो – [ ] **25**

**TS 1.6.8.1 (Padam)**

यः । वै । श्रद्धामिति श्रत् – धाम् । अनारभ्येत्यना – रभ्य । यज्ञेन ।

यजते । न । अस्य । इष्टाय । श्रत् । दधते । अपः । प्रेति । नयति ।

श्रद्धेति श्रत् – धा । वै । आपः । श्रद्धामिति श्रत् – धाम् । एव ।

आरभ्येत्या – रभ्य । यज्ञेन । यजते । उभये । अस्य ।

देवमनुष्या इति देव – मनुष्याः । इष्टाय । श्रत् । दधते । तत् ।

आहुः । अतीति । वै । एताः । वर्त्रम् । नेदन्ति । अतीति । वाचम् ।

मनः । वाव । एताः । न । अतीति । नेदन्ति । इति । मनसा । प्रेति ।

नयति । इयम् । वै । मनः । **25 (50)**

**TS 1.6.8.2**

ऽनयैवैनाः प्र णयत्य–स्कन्नहवि र्भवति य एवं वेद

यज्ञायुधानि सं भरति यज्ञो वै यज्ञायुधानि यज्ञमेव तथ्सं भरति

यदेकमेक७ंसंभरेत् पितृदेवत्यानि स्युर्यथ् सह सर्वाणि मानुषाणि

द्वेद्वे सं भरति याज्यानुवाक्ययोरेव रूपं करोत्यथो मिथुनमेव यो वै

दश यज्ञायुधानि वेद मुखतो ऽस्य यज्ञः कल्पते स्फ्य – [ ] **26**

**TS 1.6.8.2 (Padam)**

अनया । एव । एनाः । प्रेति । नयति ।

अस्कन्नहविरित्यस्कन्न – हविः । भवति । यः । एवम् । वेद ।

यज्ञायुधानीति यज्ञ – आयुधानि । समिति । भरति । यज्ञः । वै ।

यज्ञायुधानीति यज्ञ – आयुधानि । यज्ञम् । एव । तत् । समिति ।

भरति । यत् । एकमेकमित्येकम् – एकम् । संभरेदिति सं–भरेत् ।

पितृदेवत्यानीति पितृ – देवत्यानि । स्युः । यत् । सह । सर्वाणि ।

मानुषाणि । द्वेद्वे इति द्वे – द्वे । समिति । भरति ।

याज्यानुवाक्ययोरिति याज्या – अनुवाक्ययोः । एव । रूपम् ।

करोति । अथो इति । मिथुनम् । एव । यः । वै । दश ।

यज्ञायुधानीति यज्ञ – आयुधानि । वेद । मुखतः ।

अस्य । यज्ञः । कल्पते । स्फ्यः । **26 (50)**

**TS 1.6.8.3**

श्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या

चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश

यज्ञायुधानि य एवं वेद मुखतो ऽस्य यज्ञः कल्पते यो वै देवेभ्यः

प्रतिप्रोच्य यज्ञेन यजते जुषन्ते ऽस्य देवा हव्यꣳ हविर्निरुप्यमाणमभि

मन्त्रयेताग्निꣳ होतारमिह तꣳ हुव इति–[ ] **27**

**TS 1.6.8.3 (Padam)**

च । कपालानि । च । अग्निहोत्रहवणीत्यग्निहोत्र – हवनी । च ।

शूर्पम् । च । कृष्णाजिनमिति कृष्ण – अजिनम् । च । शम्या । च ।

उलूखलम् । च । मुसलम् । च । दृषत् । च । उपला । च ।

एतानि । वै । दश । यज्ञायुधानीति यज्ञ – आयुधानि । यः । एवम् ।

वेद । मुखतः । अस्य । यज्ञः । कल्पते । यः । वै । देवेभ्यः ।

प्रतिप्रोच्येति प्रति – प्रोच्य । यज्ञेन । यजते । जुषन्ते । अस्य ।

देवाः । हव्यम् । हविः । निरुप्यमाणमिति निः – उप्यमानम् ।

अभीति । मन्त्रयेत । अग्निम् । होतारम् । इह । तम् ।

हुवे । इति । **27 (50)**

**TS 1.6.8.4**

देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते जुषन्ते ऽस्य देवा हव्यमेष

वै यज्ञस्य ग्रहो गृहीत्वैव यज्ञेन यजते तदुदित्वा वाचं ँयच्छति

यज्ञस्य धृत्या अथो मनसा वै प्रजापति र्यज्ञमतनुत मनसैव तद्

यज्ञं तनुते रक्षसा–मनन्ववचाराय यो वै यज्ञं ँयोग आगते युनक्ति युङ्क्ते युञ्जानेषु कस्त्वा युनक्ति स त्वा युनक्त्वि–( )–त्याह प्रजापतिर्वै कः प्रजापतिनैवैनं ँयुनक्ति युङ्क्ते युञ्जानेषु ॥ **28**

**TS 1.6.8.4 (Padam)**

देवेभ्यः । एव । प्रतिप्रोच्येति प्रति – प्रोच्य । यज्ञेन । यजते । जुषन्ते । अस्य । देवाः । हव्यम् । एषः । वै । यज्ञस्य । ग्रहः । गृहीत्वा । एव । यज्ञेन । यजते । तत् । उदित्वा । वाचम् । यच्छति । यज्ञस्य । धृत्यै । अथो इति । मनसा । वै । प्रजापतिरिति प्रजा – पतिः । यज्ञम् । अतनुत । मनसा । एव । तत् । यज्ञम् । तनुते । रक्षसाम् । अनन्ववचारायेत्यननु–अवचाराय । यः । वै । यज्ञम् । योगे । आगत इत्या – गते । युनक्ति । युङ्क्ते । युञ्जानेषु । कः । त्वा । युनक्ति । सः । त्वा । युनक्तु ( ) । इति । आह । प्रजापतिरिति प्रजा – पतिः । वै । कः । प्रजापतिनेति प्रजा – पतिना । एव । एनम् । युनक्ति । युङ्क्ते । युञ्जानेषु ॥ **28 (61) (वैमनः–स्फ्य–इति–युनक्त्वे–कादश च)**

*(A8)*

**TS 1.6.9.1**

प्रजापति र्यज्ञा–नसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं

चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्र–मासीत्

तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमावास्या

तावानतिरात्रो य एवं ँविद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति

तावदुपाऽऽप्नोति य एवं ँविद्वान् पौर्णमासीं ँयजते

यावदुक्थ्येनोपाऽऽप्नोति – [ ] **29**

**TS 1.6.9.1 (Padam)**

प्रजापतिरिति प्रजा – पतिः । यज्ञान् । असृजत ।

अग्निहोत्रमित्यग्नि – होत्रम् । च । अग्निष्टोममित्यग्नि – स्तोमम् ।

च । पौर्णमासीमिति पौर्ण – मासीम् । च । उक्थ्यम् । च ।

अमावास्यामित्यमा–वास्याम् । च । अतिरात्रमित्यति – रात्रम् । च ।

तान् । उदिति । अमिमीत । यावत् । अग्निहोत्रमित्यग्नि – होत्रम् ।

आसीत् । तावान् । अग्निष्टोम इत्यग्नि – स्तोमः । यावती ।

पौर्णमासीति पौर्ण – मासी । तावान् । उक्थ्यः । यावती ।

अमावास्येत्यमा – वास्या । तावान् । अतिरात्र इत्यति–रात्रः । यः ।

एवम् । विद्वान् । अग्निहोत्रमित्यग्नि – होत्रम् । जुहोति । यावत् ।

अग्निष्टोमेनेत्यग्नि – स्तोमेन । उपाप्नोतीत्युप – आप्नोति । तावत् ।

उपेति । आप्नोति । यः । एवम् । विद्वान् ।

पौर्णमासीमिति पौर्ण – मासीम् । यजते । यावत् । उक्थ्येन ।

उपाप्नोतीत्युप – आप्नोति । **29 (50)**

**TS 1.6.9.2**

तावदुपाऽऽप्नोति य एवं ँविद्वानमावास्यां ँयजते

यावदतिरात्रेणोपाऽऽप्नोति तावदुपाऽऽप्नोति परमेष्ठिनो वा एष यज्ञो ऽग्र

आसीत् तेन स परमां काष्ठामगच्छत् तेन प्रजापतिं निरवासाययत्

तेन प्रजापतिः परमां काष्ठामगच्छत् तेनेन्द्रं निरवासाययत् तेनेन्द्रः

परमां काष्ठामगच्छत् तेनाग्नीषोमौ निरवासाययत् तेनाग्नीषोमौ

परमां काष्ठामगच्छतां ँय – [ ] **30**

**TS 1.6.9.2 (Padam)**

तावत् । उपेति । आप्नोति । यः । एवम् । विद्वान् ।

अमावास्यामित्यमा – वास्याम् । यजते । यावत् ।

अतिरात्रेणेत्यति – रात्रेण । उपाप्नोतीत्युप – आप्नोति । तावत् ।

उपेति । आप्नोति । परमेष्ठिनः । वै । एषः । यज्ञः । अग्रे । आसीत् ।

तेन । सः । परमाम् । काष्ठाम् । अगच्छत् । तेन । प्रजापतिमिति

प्रजा – पतिम् । निरवासाययदिति निः – अवासाययत् ।

तेन । प्रजापतिरिति प्रजा – पतिः । परमाम् । काष्ठाम् । अगच्छत् ।

तेन । इन्द्रम् । निरवासाययदिति निः–अवासाययत् । तेन । इन्द्रः ।

परमाम् । काष्ठाम् । अगच्छत् । तेन । अग्नीषोमावित्यग्नी – सोमौ ।

निरवासाययदिति निः – अवासाययत् । तेन ।

अग्नीषोमावित्यग्नी – सोमौ । परमाम् । काष्ठाम् ।

अगच्छताम् । यः । **30 (50)**

**TS 1.6.9.3**

एवं ँविद्वान् दर्.शपूर्णमासौ यजते परमामेव काष्ठां गच्छति यो वै

प्रजातेन यज्ञेन यजते प्रप्रजया पशुभि र्मिथुनै र्जायते द्वादश मासाः

सँवथ्सरो द्वादश द्वन्द्वानि दर्.शपूर्णमासयोस्तानि संपाद्यानीत्याहुर्वथ्सं

चोपावसृजत्युखां चाधि श्रयत्यव च हन्ति दृषदौ च समाहन्त्यधि च

वपते कपालानि चोप दधाति पुरोडाशं– [ ] **31**

**TS 1.6.9.3 (Padam)**

एवम् । विद्वान् । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । यजते । परमाम् । एव । काष्ठाम् । गच्छति । यः । वै । प्रजातेनेति प्र – जातेन । यज्ञेन । यजते । प्रेति । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । मिथुनैः । जायते । द्वादश । मासाः । सँवथ्सर इति सं – वथ्सरः । द्वादश । द्वन्द्वानीति द्वं – द्वानि । दर्.शपूर्णमासयोरिति दर्.श – पूर्णमासयोः । तानि । संपाद्यानीति सं– पाद्यानि । इति । आहुः । वथ्सम् । च । उपावसृजतीत्युप – अवसृजति । उखाम् । च । अधीति । श्रयति । अवेति । च । हन्ति । दृषदौ । च । समाहन्तीति सं – आहन्ति । अधीति । च । वपते । कपालानि । च । उपेति । दधाति । पुरोडाशम् । च । **31 (50)**

**TS 1.6.9.4**

चाधिश्रयत्याज्यं च स्तंबयजुश्च हरत्यभि च गृह्णाति वेदिं च परिगृह्णाति पत्नीं च संनह्यति प्रोक्षणीश्चाऽऽसादयत्याज्यं चैतानि वै

द्वादश द्वन्द्वानि दर्.शपूर्णमासयोस्तानि य एव२ं संपाद्य यजते प्रजातेनैव यज्ञेन यजते प्र प्रजया पशुभि र्मिथुनै र्जायते ॥ **32**

**TS 1.6.9.4 (Padam)**

अधिश्रयतीत्यधि – श्रयति । आज्यम् । च । स्तंबयजुरिति स्तंब – यजुः । च । हरति । अभीति । च । गृह्णाति । वेदिम् । च । परिगृह्णातीति परि – गृह्णाति । पत्नीम् । च । समिति । नह्यति । प्रोक्षणीरिति प्र – उक्षणीः । च । आसादयतीत्या – सादयति । आज्यम् । च । एतानि । वै । द्वादश । द्वन्द्वानीति द्वं – द्वानि । दर्.शपूर्णमासयोरिति दर्.श – पूर्णमासयोः । तानि । यः । एवम् । संपाद्येति सं – पाद्य । यजते । प्रजातेनेति प्र – जातेन । एव । यज्ञेन । यजते । प्रेति । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । मिथुनैः । जायते ॥ **32 (40)**

**(उक्थ्येनोपाप्नोत्य–गच्छतां ँयः– पुरोडाशं–चत्वारि२ंशच्च)** *(A9)*

**TS 1.6.10.1**

ध्रुवो ऽसि ध्रुवो ऽह२ं सजातेषु भूयासमित्याह ध्रुवानेवैनान् कुरुत उग्रो ऽस्युग्रो ऽह२ं सजातेषु भूयास–मित्याहाप्रतिवादिन एवैनान्

कुरुते ऽभिभू-रस्यभिभू-रह७ँ सजातेषु भूयासमित्याह य एवैनं प्रत्युत्पिपीते तमुपास्यते युनज्मि त्वा ब्रह्मणा दैव्येनेत्याहैष वा अग्नेर्योगस्तेनै – [ ] 33

**TS 1.6.10.1 (Padam)**

ध्रुवः । असि । ध्रुवः । अहम् । सजातेष्विति स – जातेषु । भूयासम् । इति । आह । ध्रुवान् । एव । एनान् । कुरुते । उग्रः । असि । उग्रः । अहम् । सजातेष्विति स–जातेषु । भूयासम् । इति । आह । अप्रतिवादिन इत्यप्रति – वादिनः । एव । एनान् । कुरुते । अभिभूरित्यभि – भूः । असि । अभिभूरित्यभि – भूः । अहम् । सजातेष्विति स – जातेषु । भूयासम् । इति । आह । यः । एव । एनम् । प्रत्युत्पिपीत इति प्रति–उत्पिपीते । तम् । उपेति । अस्यते । युनज्मि । त्वा । ब्रह्मणा । दैव्येन । इति । आह । एषः । वै । अग्नेः । योगः । तेन । 33 (50)

**TS 1.6.10.2**

वैनं ँयुनक्ति यज्ञस्य वै समृद्धेन देवाः सुवर्गं ँलोकमायन्. यज्ञस्य व्यृद्धेनासुरान् परा ऽभावयन्. यन्मे अग्ने अस्य यज्ञस्य रिष्यादित्याह

यज्ञस्यैव तथ्समृद्धेन यजमानः सुवर्गं ँल्लोकमेति यज्ञस्य व्यृद्धेन भ्रातृव्यान् परा भावयत्यग्निहोत्र–मेताभि र्व्याहृतीभिरुप सादयेद् यज्ञमुखं ँवा अग्निहोत्रं ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म– [ ] 34

**TS 1.6.10.2 (Padam)**

एव । एनम् । युनक्ति । यज्ञस्य । वै । समृद्धेनेति सं – ऋद्धेन । देवाः । सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् । यज्ञस्य । व्यृद्धेनेति वि – ऋद्धेन । असुरान् । परेति । अभावयन्न् । यत् । मे । अग्ने । अस्य । यज्ञस्य । रिष्यात् । इति । आह । यज्ञस्य । एव । तत् । समृद्धेनेति सं – ऋद्धेन । यजमानः । सुवर्गमिति सुवः – गम् । लोकम् । एति । यज्ञस्य । व्यृद्धेनेति वि – ऋद्धेन । भ्रातृव्यान् । परेति । भावयति । अग्निहोत्रमित्यग्नि – होत्रम् । एताभिः । व्याहृतीभिरिति व्याहृति – भिः । उपेति । सादयेत् । यज्ञमुखमिति यज्ञ – मुखम् । वै । अग्निहोत्रमित्यग्नि – होत्रम् । ब्रह्म । एताः । व्याहृतय इति वि – आहृतयः । यज्ञमुख इति यज्ञ – मुखे । एव । ब्रह्म । 34 (50)

**TS 1.6.10.3**

कुरुते सँवथ्सरे पर्यागत एताभिरेवोप सादयेद्–ब्रह्मणैवोभयतः

सँवथ्सरं परि गृह्णाति दर्.शपूर्णमासौ चातुर्मास्यान्यालभमान

एताभिर्व्याहृतीभिर्हवी♂ष्याऽऽ सादयेद्–यज्ञमुखं ँवै दर्.शपूर्णमासौ

चातुर्मास्यानि ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म कुरुते सँवथ्सरे

पर्यागत एताभिरेवाऽऽ सादयेद् ब्रह्मणैवोभयतः सँवथ्सरं परिगृह्णाति

यद्–वै यज्ञस्य साम्ना क्रियते राष्ट्रं – [ ] **35**

**TS 1.6.10.3 (Padam)**

कुरुते । सँवथ्सर इति सं – वथ्सरे । पर्यागत इति परि – आगते ।

एताभिः । एव । उपेति । सादयेत् । ब्रह्मणा । एव । उभयतः ।

सँवथ्सरमिति सं – वथ्सरम् । परीति । गृह्णाति ।

दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ । चातुर्मास्यानीति

चातुः – मास्यानि । आलभमान इत्या – लभमानः । एताभिः ।

व्याहृतीभिरिति व्याहृति – भिः । हवी♂षि । एति । सादयेत् ।

यज्ञमुखमिति यज्ञ – मुखम् । वै । दर्.शपूर्णमासाविति

दर्.श – पूर्णमासौ । चातुर्मास्यानीति चातुः – मास्यानि । ब्रह्म ।

एताः । व्याहृतय इति वि – आहृतयः । यज्ञमुख इति यज्ञ – मुखे । एव । ब्रह्म । कुरुते । सँवथ्सर इति सं – वथ्सरे । पर्यागत इति परि – आगते । एताभिः । एव । एति । सादयेत् । ब्रह्मणा । एव । उभयतः । सँवथ्सरमिति सं – वथ्सरम् । परीति । गृह्णाति । यत् । वै । यज्ञस्य । साम्ना । क्रियते । राष्ट्रम् । **35 (50)**

**TS 1.6.10.4**

ँयज्ञस्याऽऽशीर्गच्छति यदृचा विशं ँयज्ञस्याऽऽशीर्गच्छत्यथ ब्राह्मणो ऽनाशीर्केण यज्ञेन यजते सामिधेनी–रनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्–दद्ध्याद् ब्रह्मैव प्रतिपदं कुरुते तथा ब्राह्मणः साशीर्केण यज्ञेन यजते यं कामयेत यजमानं भ्रातृव्यमस्य यज्ञस्याऽऽशीर्गच्छेदिति तस्यै ता व्याहृतीः पुरोनुवाक्यायां दद्ध्याद् भ्रातृव्यदेवत्या वै पुरोनुवाक्या भ्रातृव्यमेवास्य यज्ञस्या – [ ] **36**

**TS 1.6.10.4 (Padam)**

यज्ञस्य । आशीरित्या – शीः । गच्छति । यत् । ऋचा । विशम् । यज्ञस्य । आशीरित्या – शीः । गच्छति । अथ । ब्राह्मणः । अनाशीर्केण । यज्ञेन । यजते । सामिधेनीरिति साम् – इधेनीः ।

अनुवक्ष्यन्नित्यनु – वक्ष्यन्न् । एताः । व्याहृतीरिति वि – आहृतीः । पुरस्तात् । दद्ध्यात् । ब्रह्म । एव । प्रतिपदमिति प्रति–पदम् । कुरुते । तथा । ब्राह्मणः । साशीर्केणेति स –आशीर्केण । यज्ञेन । यजते । यम् । कामयेत । यजमानम् । भ्रातृव्यम् । अस्य । यज्ञस्य । आशीरित्या – शीः । गच्छेत् । इति । तस्य । एताः । व्याहृतीरिति वि – आहृतीः । पुरोनुवाक्यायामिति पुरः – अनुवाक्यायाम् । दद्ध्यात् । भ्रातृव्यदेवत्येति भ्रातृव्य – देवत्या । वै । पुरोनुवाक्येति पुरः – अनुवाक्या । भ्रातृव्यम् । एव । अस्य । यज्ञस्य । **36 (50)**

**<u>TS 1.6.10.5</u>**

ऽऽशीर्गच्छति यान् कामयेत यजमानान्थ् समावत्येनान्. यज्ञस्या ऽऽशीर्गच्छेदिति तेषामेता व्याहृतीः पुरोनुवाक्याया अर्द्धर्च एकां दद्ध्याद्याज्यायै पुरस्तादेकां ँयाज्याया अर्द्धर्च एकां तथैनान्थ् समावती यज्ञस्याऽऽशीर्गच्छति यथा वै पर्जन्यः सुवृष्टं ँवर्.षत्येवं

ँयज्ञो यजमानाय वर्.षति स्थलयोदकं परिगृह्णन्त्याशिषा यज्ञं

ँयजमानः परि गृह्णातिमनो ऽसि प्राजापत्यं – [ ] **37**

**TS 1.6.10.5 (Padam)**

आशीरित्या – शीः । गच्छति । यान् । कामयेत । यजमानान् ।

समावती । एनान् । यज्ञस्य । आशीरित्या – शीः । गच्छेत् । इति ।

तेषाम् । एताः । व्याहृतीरिति वि – आहृतीः ।

पुरोनुवाक्याया इति पुरः–अनुवाक्यायाः । अर्द्धर्च इत्यर्द्ध–ऋचे ।

एकाम् । दद्ध्यात् । याज्यायै । पुरस्तात् । एकाम् । याज्यायाः ।

अर्द्धर्च इत्यर्द्ध – ऋचे । एकाम् । तथा । एनान् । समावती ।

यज्ञस्य । आशीरित्या – शीः । गच्छति । यथा । वै । पर्जन्यः ।

सुवृष्टमिति सु – वृष्टम् । वर्.षति । एवम् । यज्ञः । यजमानाय ।

वर्.षति । स्थलया । उदकम् । परिगृह्णन्तीति परि – गृह्णन्ति ।

आशिषेत्या – शिषा । यज्ञम् । यजमानः । परीति । गृह्णाति । मनः ।

असि । प्राजापत्यमिति प्राजा – पत्यम् । **37 (50)**

**TS 1.6.10.6**

मनसा मा भूतेनाऽऽ विशेत्याह मनो वै प्राजापत्यं प्राजापत्यो यज्ञो मन एव यज्ञमात्मन् धत्ते वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाऽऽ विशेत्याहैन्द्री वै वाग्वाच–मेवैन्द्री–मात्मन् धत्ते ॥ **38**

**TS 1.6.10.6 (Padam)**

मनसा । मा । भूतेन । एति । विश । इति । आह । मनः । वै । प्राजापत्यमिति प्राजा – पत्यम् । प्राजापत्य इति प्राजा – पत्यः । यज्ञः । मनः । एव । यज्ञम् । आत्मन्न् । धत्ते । वाक् । असि । ऐन्द्री । सपत्नक्षयणीति सपत्न – क्षयणी । वाचा । मा । इन्द्रियेण । एति । विश । इति । आह । ऐन्द्री । वै । वाक् । वाचम् । एव । ऐन्द्रीम् । आत्मन्न् । धत्ते ॥ **38 (36)** **(तेनै–व ब्रह्म– राष्ट्र–मेवास्य यज्ञस्य–प्राजापत्यॅ–षट्त्रिॅंशच्च)** *(A10)*

**TS 1.6.11.1**

यो वै सप्तदशं प्रजापतिं ँयज्ञमन्वायत्तं ँवेद प्रति यज्ञेन तिष्ठति न यज्ञाद् भ्रॅंशत आ श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं ँयजेति द्व्यक्षरं ँये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार

एष वै सप्तदशः प्रजापति र्यज्ञमन्वायत्तो य एवं ँवेद प्रति यज्ञेन तिष्ठति न यज्ञाद्–भ्र॒ꣳशते यो वै यज्ञस्य प्रायणं प्रतिष्ठा– [ ] **39**

**TS 1.6.11.1 (Padam)**

यः । वै । सप्तदशमिति सप्त – दशम् । प्रजापतिमिति प्रजा – पतिम् । यज्ञम् । अन्वायत्तमित्यनु – आयत्तम् । वेद । प्रतीति । यज्ञेन । तिष्ठति । न । यज्ञात् । भ्र॒ꣳशते । एति । श्रावय । इति । चतुरक्षरमिति चतुः – अक्षरम् । अस्तु । श्रौषट् । इति । चतुरक्षरमिति चतुः – अक्षरम् । यज । इति । द्व्यक्षरमिति द्वि – अक्षरम् । ये । यजामहे । इति । पञ्चाक्षरमिति पञ्च – अक्षरम् । द्व्यक्षर इति द्वि – अक्षरः । वषट्कार इति वषट् – कारः । एषः । वै । सप्तदश इति सप्त – दशः । प्रजापतिरिति प्रजा – पतिः । यज्ञम् । अन्वायत्त इत्यनु–आयत्तः । यः । एवम् । वेद । प्रतीति । यज्ञेन । तिष्ठति । न । यज्ञात् । भ्र॒ꣳशते । यः । वै । यज्ञस्य । प्रायणमिति प्र – अयनम् । प्रतिष्ठामिति प्रति – स्थाम् । **39 (50)**

**TS 1.6.11.2**

–मुदयनं ँवेद प्रतिष्ठितेनारिष्टेन यज्ञेन स२ँस्थां गच्छत्याश्रावयास्तु

श्रौषड् यज ये यजामहे वषट्कार एतद्–वै यज्ञस्य प्रायणमेषा

प्रतिष्ठैतदुदयनं ँय एवं ँवेद प्रतिष्ठितेनारिष्टेन यज्ञेन

स२ँस्थां गच्छति यो वै सूनृतायै दोहं ँवेद दुह एवैनां ँयज्ञो

वै सूनृताऽऽ श्रावयेत्यैवैना–मह्वदस्तु – [ ] **40**

**TS 1.6.11.2 (Padam)**

उदयनमित्युत् – अयनम् । वेद । प्रतिष्ठितेनेति प्रति – स्थितेन ।

अरिष्टेन । यज्ञेन । स२ँस्थामिति सं – स्थाम् । गच्छति । एति ।

श्रावय । अस्तु । श्रौषट् । यज । ये । यजामहे । वषट्कार इति

वषट् – कारः । एतत् । वै । यज्ञस्य । प्रायणमिति प्र – अयनम् ।

एषा । प्रतिष्ठेति प्रति – स्था । एतत् । उदयनमित्युत् – अयनम् ।

यः । एवम् । वेद । प्रतिष्ठितेनेति प्रति–स्थितेन । अरिष्टेन । यज्ञेन ।

स२ँस्थामिति सं – स्थाम् । गच्छति । यः । वै । सूनृतायै । दोहम् ।

वेद । दुहे । एव । एनाम् । यज्ञः । वै । सूनृता । एति । श्रावय ।

इति । एति । एव । एनाम् । अह्वत् । अस्तु । **40 (50)**

**TS 1.6.11.3**

श्रौषडित्युपावास्राग्–यजेत्युदनैषीद्–ये यजामह इत्युपा ऽसदद्–

वषट्कारेण दोग्ध्येष वै सूनृतायै दोहो य एवं वेद दुह एवैनां देवा

वै सत्रमासत तेषां दिशो ऽदस्यन् त एतामार्द्रां पङ्क्तिमपश्यन्

नाऽऽ श्रावयेति पुरोवात–मजनयन्नस्तु श्रौषडित्यभ्रꣳ समप्लावयन्.

यजेति विद्युत – [ ] **41**

**TS 1.6.11.3 (Padam)**

श्रौषट् । इति । उपावास्रागित्युप–अवास्राक् । यज । इति ।

उदिति । अनैषीत् । ये । यजामहे । इति । उपेति । असदत् ।

वषट्कारेणेति वषट्–कारेण । दोग्धि । एषः । वै । सूनृतायै । दोहः ।

यः । एवम् । वेद । दुहे । एव । एनाम् । देवाः । वै । सत्रम् ।

आसत । तेषाम् । दिशः । अदस्यन्न् । ते । एताम् । आर्द्राम् ।

पङ्क्तिम् । अपश्यन्न् । एति । श्रावय । इति । पुरोवातमिति

पुरः – वातम् । अजनयन्न् । अस्तु । श्रौषट् । इति । अभ्रम् ।

समिति । अप्लावयन्न् । यज । इति ।

विद्युतमिति वि – द्युतम् । **41 (50)**

**TS 1.6.11.4**

–मजनयन्. ये यजामहे इति प्रावर्.षय–न्नभ्यस्तनयन् वषट्कारेण

ततो वै तेभ्यो दिशः प्राप्यायन्त य एवं ँवेद प्रास्मै दिशः प्यायन्ते

प्रजापतिं त्वोवेद प्रजापति–स्त्वँवेद यं प्रजापतिर्वेद स पुण्यो

भवत्येष वै छन्दस्यः प्रजापतिरा श्रावयास्तु श्रौषड् यज ये यजामहे

वषट्कारो य एवं ँवेद पुण्यो भवति वसन्त – [ ] **42**

**TS 1.6.11.4 (Padam)**

अजनयन्न् । ये । यजामहे । इति । प्रेति । अवर्.षयन्न् । अभीति ।

अस्तनयन्न् । वषट्कारेणेति वषट् – कारेण । ततः । वै । तेभ्यः ।

दिशः । प्रेति । अप्यायन्त । यः । एवम् । वेद । प्रेति । अस्मै ।

दिशः । प्यायन्ते । प्रजापतिमिति प्रजा – पतिम् ।

त्वोवेदेति त्वः – वेद । प्रजापतिरिति प्रजा – पतिः । त्वँवेदेति

त्वं – वेद । यम् । प्रजापतिरिति प्रजा–पतिः । वेद । सः । पुण्यः ।

भवति । एषः । वै । छन्दस्यः । प्रजापतिरिति प्रजा – पतिः । एति ।

श्रावय । अस्तु । श्रौषट् । यज । ये । यजामहे ।

वषट्कार इति वषट् – कारः । यः । एवम् । वेद । पुण्यः । भवति । वसन्तम् । **42 (50)**

**TS 1.6.11.5**

–मृतूनां प्रीणामीत्याहर्तवो वै प्रयाजा ऋतूनेव प्रीणाति ते ऽस्मै प्रीता यथापूर्वं कल्पन्ते कल्पन्ते ऽस्मा ऋतवो य एवं वेदाग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयास–मित्याहाग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान् ताभ्यामेव चक्षुरात्मन् धत्ते ऽग्नेरहं देवयज्यया ऽन्नादो भूयासमित्याहाग्निर्वै देवानामन्नादस्ते नै वा – [ ] **43**

**TS 1.6.11.5 (Padam)**

ऋतूनाम् । प्रीणामि । इति । आह । ऋतवः । वै । प्रयाजा इति प्र – याजाः । ऋतून् । एव । प्रीणाति । ते । अस्मै । प्रीताः । यथापूर्वमिति यथा – पूर्वम् । कल्पन्ते । कल्पन्ते । अस्मै । ऋतवः । यः । एवम् । वेद । अग्नीषोमयोरित्यग्नी – सोमयोः । अहम् । देवयज्ययेति देव–यज्यया । चक्षुष्मान् । भूयासम् । इति । आह । अग्नीषोमाभ्यामित्यग्नी – सोमाभ्याम् । वै । यज्ञः । चक्षुष्मान् । ताभ्याम् । एव । चक्षुः । आत्मन्न् । धत्ते । अग्नेः ।

अहम् । देवयज्ययेति देव – यज्यया । अन्नाद इत्यन्न – अदः ।
भूयासम् । इति । आह । अग्निः । वै । देवानाम् ।
अन्नाद इत्यन्न – अदः । तेन । एव । **43 (50)**

**TS 1.6.11.6**

ऽन्नाद्य–मात्मन् धत्ते दब्धिरस्यदब्धो भूयासममुं दभेय–मित्याहैतया
वै दब्ध्या देवा असुरानदभ्नुवन् तयैव भ्रातृव्यं दभ्नोत्यग्नीषोमयोरहं
देवयज्यया वृत्रहा भूयासमित्याहा ऽग्नीषोमाभ्यां ँवा इन्द्रो
वृत्रमहन् ताभ्यामेव भ्रातृव्य७ स्तृणुत इन्द्राग्नियोरहं
देवयज्ययेन्द्रियाव्यन्नादो भूयासमित्याहेन्द्रियाव्येवान्नादो
भवतीन्द्रस्या – [ ] **44**

**TS 1.6.11.6 (Padam)**

अन्नाद्यमित्यन्न – अद्यम् । आत्मन्न् । धत्ते । दब्धिः । असि ।
अदब्धः । भूयासम् । अमुम् । दभेयम् । इति । आह । एतया । वै ।
दब्ध्या । देवाः । असुरान् । अदभ्नुवन्न् । तया । एव । भ्रातृव्यम् ।
दभ्नोति । अग्नीषोमयोरित्यग्नी – सोमयोः । अहम् ।
देवयज्ययेति देव – यज्यया । वृत्रहेति वृत्र – हा । भूयासम् ।

इति । आह । अग्नीषोमाभ्यामित्यग्नी – सोमाभ्याम् । वै । इन्द्रः ।

वृत्रम् । अहन्न् । ताभ्याम् । एव । भ्रातृव्यम् । स्तृणुते ।

इन्द्राग्नियोरितीन्द्र – अग्नियोः । अहम् । देवयज्ययेति

देव – यज्यया । इन्द्रियावी । अन्नाद इत्यन्न – अदः । भूयासम् ।

इति । आह । इन्द्रियावी । एव । अन्नाद इत्यन्न – अदः । भवति ।

इन्द्रस्य । **44 (50)**

**TS 1.6.11.7**

ऽहं देवयज्ययेन्द्रियावी भूयासमित्याहेन्द्रियाव्येव भवति

महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयमित्याह

जेमानमेव महिमानं गच्छत्यग्नेः स्विष्टकृतो ऽहं देवयज्यया

ऽऽयुष्मान्. यज्ञेन प्रतिष्ठां गमेयमित्याहायुरेवात्मन् धत्ते प्रति

यज्ञेन–तिष्ठति ॥ **45**

**TS 1.6.11.7 (Padam)**

अहम् । देवयज्ययेति देव–यज्यया । इन्द्रियावी । भूयासम् । इति ।

आह । इन्द्रियावी । एव । भवति । महेन्द्रस्येति महा – इन्द्रस्य ।

अहम् । देवयज्ययेति देव – यज्यया । जेमानम् । महिमानम् ।

गमेयम् । इति । आह । जेमानम् । एव । महिमानम् । गच्छति ।

अग्नेः । स्विष्टकृत इति स्विष्ट – कृतः । अहम् । देवयज्ययेति

देव – यज्यया । आयुष्मान् । यज्ञेन । प्रतिष्ठामिति प्रति– स्थाम् ।

गमेयम् । इति । आह । आयुः । एव । आत्मन्न् । धत्ते । प्रतीति ।

यज्ञेन । तिष्ठति ॥ **45 (38)**

**(प्रतिष्ठा–मह्वदस्तु–विद्युतं–ँवसन्तं–तेनैवे–न्द्रस्या–ष्टात्रिꣳशच्च)**

*(A11)*

**TS 1.6.12.1**

इन्द्रं ँवो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।

शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥

इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥

अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।

अनु–[ ] **46**

**TS 1.6.12.1 (Padam)**

इन्द्रम् । वः । विश्वतः । परीति । हवामहे । जनेभ्यः ॥ अस्माकम् ।

अस्तु । केवलः ॥ इन्द्रम् । नरः । नेमधितेति नेम – धिता ।

हवन्ते । यत् । पार्याः । युनजते । धियः । ताः ॥ शूरः । नृषातेति

नृ – साता । शवसः । चकानः । एति । गोमतीति गो – मति ।

व्रजे । भज । त्वम् । नः ॥ इन्द्रियाणि । शतक्रतो इति

शत – क्रतो । या । ते । जनेषु । पञ्चस्विति पञ्च – सु ॥

इन्द्र । तानि । ते । एति । वृणे ॥ अन्विति । ते । दायि । महे ।

इन्द्रियाय । सत्रा । ते । विश्वम् । अन्विति ।

वृत्रहत्य इति वृत्र – हत्ये ॥ अन्विति । **46 (50)**

**TS 1.6.12.2**

क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥

आयस्मिन् थ्सप्तवासवा स्तिष्ठन्ति स्वारुहो यथा ।

ऋषिर्. ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः ॥

आमासु पक्वमैरय आ सूर्य॒ं रोहयो दिवि ।

घर्मं न सामन् तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः ॥

इन्द्रमिद् गाथिनो बृहदिन्द्र–मर्केभि–रर्किणः । इन्द्रं वाणीरनूषत ॥
गायन्ति त्वा गायत्रिणो – [ ] **47**

**TS 1.6.12.2 (Padam)**

क्षत्रम् । अन्विति । सहः । यजत्र । इन्द्र । देवेभिः । अन्विति । ते ।
नृषह्य इति नृ–सह्ये ॥ एति । यस्मिन्न् । सप्त । वासवाः ।
तिष्ठन्ति । स्वारुह इति स्व – रुहः । यथा ॥ ऋषिः । ह ।
दीर्घश्रुत्तम इति दीर्घश्रुत् – तमः । इन्द्रस्य । घर्मः । अतिथिः ॥
आमासु । पक्वम् । ऐरयः । एति । सूर्यम् । रोहयः । दिवि ॥
घर्मम् । न । सामन्न् । तपत । सुवृक्तिभिरिति सुवृक्ति – भिः ।
जुष्टम् । गिर्वणसे । गिरः ॥ इन्द्रम् । इत् । गाथिनः । बृहत् ।
इन्द्रम् । अर्केभिः । अर्किणः ॥ इन्द्रम् । वाणीः । अनूषत ॥
गायन्ति । त्वा । गायत्रिणः । **47 (50)**

**TS 1.6.12.3**

ऽर्चन्त्यर्क–मर्किणः ।
ब्रह्माणस्त्वा शतक्रतवुद्व॒ꣳश–मिव येमिरे ॥
अꣳहोमुचे प्र **भरेमा** मनीषा–मोषिष्ठदाव्.न्ने सुमतिं गृणानाः ।

इदमिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः ॥
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्र–मह्नः ।
अꣳहसो यत्र पीपरद्–यथा नो नावेव यान्तमुभये हवन्ते ॥
प्र सम्राजं प्रथम–मद्ध्वराणा – [ ] **48**

**<u>TS 1.6.12.3 (Padam)</u>**

अर्चन्ति । अर्कम् । अर्किणः ॥ ब्रह्माणः । त्वा ।
शतक्रतविति शत – क्रतो । उदिति । वꣳशम् । इव । येमिरे ॥
अꣳहोमुच इत्यꣳहः – मुचे । प्रेति । भरेम । मनीषाम् ।
ओषिष्ठदाव्.न्न इत्योषिष्ठ – दाव्.न्ने । सुमतिमिति सु – मतिम् ।
गृणानाः ॥ इदम् । इन्द्र । प्रतीति । हव्यम् । गृभाय । सत्याः ।
सन्तु । यजमानस्य । कामाः ॥ विवेष । यत् । मा । धिषणा ।
जजान । स्तवै । पुरा । पार्यात् । इन्द्रम् । अह्नः ॥ अꣳहसः ।
यत्र । पीपरत् । यथा । नः । नावा । इव । यान्तम् । उभये । हवन्ते ॥
प्रेति । सम्राजमिति सं – राजम् । प्रथमम् । अद्ध्वराणाम् । **48 (50)**

**TS 1.6.12.4**

–मꣳहोमुचं ँवृषभं ँयज्ञियानां ।
अपां नपातमश्विना हयन्त–मस्मिन् नर इन्द्रियं धत्तमोजः ॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासति ॥
इन्द्र क्षत्रमभि वाममोजो ऽजायथा वृषभ चर्.षणीनां ।
अपानुदो जन–ममित्रयन्त–मुरुं देवेभ्यो अकृणो–रु लोकं ॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत – [ ] **49**

**TS 1.6.12.4 (Padam)**

अꣳहोमुचमित्यꣳहः – मुचम् । वृषभम् । यज्ञियानाम् ॥ अपाम् ।
नपातम् । अश्विना । हयन्तम् । अस्मिन्न् । नरः । इन्द्रियम् । धत्तम् ।
ओजः ॥ वीति । नः । इन्द्र । मृधः । जहि । नीचा । यच्छ ।
पृतन्यतः ॥ अधस्पदमित्यधः – पदम् । तम् । ईम् । कृधि ।
यः । अस्मान् । अभिदासतीत्यभि – दासति ॥ इन्द्र । क्षत्रम् ।
अभीति । वामम् । ओजः । अजायथाः । वृषभ । चर्.षणीनाम् ॥
अपेति । अनुदः । जनम् । अमित्रयन्तमित्यमित्र – यन्तम् । उरुम् ।

देवेभ्यः । अकृणोः । उ । लोकम् ॥ मृगः । न । भीमः । कुचरः ।
गिरिष्ठा इति गिरि – स्थाः । परावत इति परा – वतः । **49 (50)**

**TS 1.6.12.5**

आ जगामा परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्मं ँवि शत्रून् ताढि वि मृधो नुदस्व ॥
वि शत्रून्. वि मृधो नुद विवृत्रस्य हनू रुज ।
वि मन्युमिन्द्र भामितो ऽमित्रस्याभिदासतः ॥
त्रातार–मिन्द्र–मवितार–मिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रं ।
हुवे नु शक्रं पुरुहूतमिन्द्रꣲ स्वस्ति नो मघवा धात्विन्द्रः ॥
मा ते अस्याꣳ – [ ] **50**

**TS 1.6.12.5 (Padam)**

एति । जगाम । परस्याः ॥ सृकम् । सꣳशायेति सं–शाय । पविम् ।
इन्द्र । तिग्मम् । वीति । शत्रून् । ताढि । वीति । मृधः । नुदस्व ॥
वीति । शत्रून् । वीति । मृधः । नुद । वीति । वृत्रस्य ।
हनू इति । रुज ॥ वीति । मन्युम् । इन्द्र । भामितः । अमित्रस्य ।
अभिदासत इत्यभि – दासतः ॥ त्रातारम् । इन्द्रम् । अवितारम् ।

इन्द्रम् । हवेहव इति हवे – हवे । सुहवमिति सु – हवम् ।
शूरम् । इन्द्रम् ॥ हुवे । नु । शक्रम् । पुरुहूतमिति पुरु – हूतम् ।
इन्द्रम् । स्वस्ति । नः । मघवेति मघ – वा । धातु । इन्द्रः ॥ मा ।
ते । अस्याम् । **50 (50)**

**TS 1.6.12.6**

सहसावन् परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नो ऽवृकेभि–र्वरूथैस्तव प्रियासः सूरिषु स्याम ॥
अनवस्ते रथमश्वाय तक्षन्–त्वष्टा वज्रं पुरुहूत द्युमन्तं ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्द्धयन्नहये हन्तवा उ ॥
वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः ।
अनश्वासो ये पवयो ऽरथा इन्द्रेषिता अभ्यवर्त्तन्त दस्यून् ॥ **51**

**TS 1.6.12.6 (Padam)**

सहसावन्निति सहसा – वन्न् । परिष्टौ । अघाय । भूम । हरिव इति
हरि – वः । परादा इति परा – दै ॥ त्रायस्व । नः । अवृकेभिः ।
वरूथैः । तव । प्रियासः । सूरिषु । स्याम ॥ अनवः । ते । रथम् ।
अश्वाय । तक्षन्न् । त्वष्टा । वज्रम् । पुरुहूतेति पुरु – हूत ।

द्युमन्तमिति द्यु – मन्तम् ॥ ब्रह्माणः । इन्द्रम् । महयन्तः । अर्कैः ।
अवर्धयन्न् । अहये । हन्तवै । उ ॥ वृष्णे । यत् । ते । वृषणः ।
अर्कम् । अर्चान् । इन्द्र । ग्रावाणः । अदितिः । सजोषा इति
स – जोषाः ॥ अनश्वासः । ये । पवयः । अरथाः ।
इन्द्रेषिता इतीन्द्र – इषिताः । अभ्यवर्तन्तेत्यभि – अवर्तन्त ।
दस्यून् ॥ **51 (48) (वृत्रहत्येऽनु–गायत्रिणो–ऽद्ध्वराणां–परावतो–ऽस्या–मष्टाचत्वारिꣳशच्च)** *(A12)*

======================

**Prasna Korvai with starting Padams of 1 to 12 Anuvaakams :-**

(सन्त्वा सिञ्चामि–ध्रुवो–ऽस्यग्निर्मा–बर्.हिषोऽह–मा प्यायता–मगन्म–यथा वै–यो वै श्रद्धां– प्रजापतिर्यज्ञान्–ध्रुवोऽसीत्याह–यो वै सप्तदश–मिन्द्रं ँवो–द्वादश । )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(संत्वा–बर्.हिषोऽहं–ँयथा वा–एवं ँविद्वा–ञ्छ्रौषट्थ्–साहसाव–न्नेकपञ्चाशत् । )

**First and Last Padam of Sixth Prasnam:-**

(सन्त्वा सिञ्चामि – दस्यून् । )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमकाण्डे षष्ठः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 1,Prasanam 6 (TS 1.6)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 3 | 133 |
| Anuvakam 2 | 4 | 186 |
| Anuvakam 3 | 3 | 156 |
| Anuvakam 4 | 4 | 194 |
| Anuvakam 5 | 2 | 129 |
| Anuvakam 6 | 4 | 185 |
| Anuvakam 7 | 4 | 203 |
| Anuvakam 8 | 4 | 211 |
| Anuvakam 9 | 4 | 190 |
| Anuvakam 10 | 6 | 286 |
| Anuvakam 11 | 7 | 338 |
| Anuvakam 12 | 6 | 298 |
| Total → | 51 | 2509 |

**( To download our vedic compilations please visit www.vedavms.in )**